# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – पारस्करगृह्यसूत्रम् तृतीयकाण्डम् (गादाधरीटीकासमेतम्)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः। प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या।**

१ यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम्।
संवत्सरस्य या पत्नी सो नो अस्तु सुभङ्गली स्वाहा॥

२ कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा।
कामाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि कामकामाय स्वाहा॥

३ स यदि दुर्बलो रथः स्यात् तमास्थाय जपेत्।
अयं वामश्विना रथो मा दुर्गे मास्तरोरिषदिति॥

४ अस्वावती गोमती सूनृतावत्यच्छयस्व महते सौभाग्याय।
आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः॥

**प्रश्नः** २ मार्गशीर्षे पौर्णमास्यामाग्रहायणि कर्म।

**प्रश्नः** ३ ग्रन्थानुगुणं शीर्षरोगभेषजं वर्णयत।

**प्रश्नः** ४ पारस्करगृह्यसूत्रग्रन्थस्य विषयवस्तु परिचाययत।

**प्रश्नः** ५ नैमित्तिकदोषनिवारणं सविस्तरं ग्रन्थानुसारं लिखत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः ससन्दर्भं भावार्थं स्पष्टयत।**

१ अथातोऽवकीर्णप्रायश्चित्तम्।
२ नित्यस्नानविधानं सप्रमाणं निरूपयत।
३ सपिण्डीकरणश्राद्धविधिं ग्रन्थोक्तदिशा व्याख्यायत।
४ एकोद्दिष्टश्राद्धविधिं व्याख्यायत।

**प्रश्नः ७** पारस्करगृह्यसूत्रस्य धर्मपालने उपयोगिता ।

**प्रश्नः ८** तृतीयकाण्डस्य सारांशं लिख्यताम् ।

**प्रश्नः ९** पारस्करगृह्यसूत्रे कर्मकाण्डविधानम् ।

**प्रश्नः १०** काम्यश्राद्धानां पृथक् पृथक् यथाग्रन्थं निरूपणं कुरुत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ पारस्करगृह्यसूत्रे कति काण्डानि सन्ति ?
२ पारस्करगृह्यसूत्रं कस्मात् वेदादागच्छति ?
३ सुहृद् इत्यस्य कोऽर्थः ?
४ संस्कारशब्दस्य कोऽर्थः ?
५ श्राद्धशब्दस्य कोऽर्थः ?
६ तृतीयकाण्डे कति कण्डिकाः सन्ति ?
७ कति संस्काराः सन्ति ?
८ पारस्कर इति कस्याभिधानमस्ति ?
९ निर्ऋतिं केन यजेत् ?
१० पारस्करगृह्यसूत्रस्य आदिमं सूत्रं किम् ?
११ कति महायज्ञाः सन्ति ?
१२ अर्घविधि इत्यस्य अपरं नाम किम् ?
१३ का नाम स्मृतिः का च संज्ञा ?
१४ वेदाङ्गानि कति सन्ति ?
१५ ग्रन्थकर्तुः नाम किम् ?

****